१

॥ श्रीगणेशायनमः॥ वटुकभैरवायनम॥ मेरुपृ-
ष्ठे सुखासीनं देवदेवं त्रिलोचनं॥ शंकरंपरिपप्र-
च्छ पार्वतीपरमेश्वरं॥१॥ श्रीपार्वत्युवाच॥ भगवा-
न्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु॥ आपदुद्धार-
णं मंत्रं सर्वसिद्धिप्रदंनृणां॥२॥ सर्वेषां चैवभू-
तानां हितार्थं वांछितं मया॥ विशेषतस्तु राज्ञां वै
शांतिपुष्टिप्रसाधनं॥३॥ यानांचनाशनंसुख-

१

अंगन्यासकरन्यासदेहन्याससमन्वितं॥ वक्तुमर्ह-
सि देवेश मम हर्षविवर्द्धनं॥४॥ श्रीईश्वरउवाच॥
शृणु देवि महामंत्रमापदुद्धारहेतुकं॥ सर्वदुःख-
प्रशमनं सर्वशत्रुविनाशनं॥५॥ अपस्मारादिरो-
गाणां ज्वरादीनां विशेषतः॥ नाशनं स्मृतिमात्रे-
ण मंत्रराजमिमं प्रिये॥६॥ ग्रहरोगभयानां च ना-
शनं सुखवर्द्धनं॥ स्नेहाद्वक्ष्यामि तं मंत्रं सर्वसारमि-

२

ॐ ह्रीं वं कामस्थापदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ४

मं प्रिये ॥ ७ ॥ प्रणवं पूर्वमुद्धृत्य देवि प्रणवमुद्धरेत्

॥ वटुकायेति वै पश्चादापदुद्धारणाय च ॥ ८ ॥

कुरुद्वयं ततः पश्चाद्वटुकाय पुनर्वदेत् ॥ देवि

प्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये ॥ ९ ॥ मंत्रोद्धा

रमिमं देवि त्रैलोक्ये चातिदुर्लभम् ॥ अप्रकाश्य

मिमं मंत्रं सर्वशक्तिसमन्वितं ॥ १० ॥ स्मरणादेव

मंत्रस्य भूतप्रेतपिशाचकाः ॥ विद्रवंसति भी

२

ता वै कालरुद्रादिव प्रजाः ॥ ११ ॥ पठेद्वा पाठयेद्वापि पू

जयेद्वापि पुस्तकं ॥ नाग्निचौरभयं तत्र ग्रहराजभ

यं तथा ॥ १२ ॥ न च मारीभयं किंचित्सर्वत्र सुखवा

न्भवेत् ॥ आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसंपदः

॥ १३ ॥ भवंति सततं तस्य पुस्तकस्यापि पूजनात् ॥ श्री

पार्वत्युवाच ॥ त्वया च कथितो देव भैरवः कालउ

त्तमः ॥ १४ ॥ तस्य नामसहस्राणि प्रयुतान्यर्बुदानि

३

च॥ सारमुद्धृत्य तेषां वै नामाष्टशतकं वद॥ १५॥
यानि संकीर्त्तयन्मर्त्यः सर्वदुःखविवर्जितः॥ स
र्वान्कामानवाप्नोति साधकः सिद्धिमेव च॥ १६
॥ श्रीईश्वर उवाच॥ शृणु देवि प्रवक्ष्यामि भैरव
स्य महात्मनः॥ आपदुद्धारणस्येह नामाष्टश
तमुत्तमं॥ १७ सर्वपापहरं पुण्यं सर्वापद्विनिवा
रणं॥ सर्वकामार्थदं देवि साधकानां शुभावहं

३

॥ १८॥ नामाष्टशतकस्यास्य छंदोनुष्टुप्प्रकीर्त्तितः॥
बृहदारण्यको नाम ऋषिर्देवोथ भैरवः॥ १९॥ सर्व
कामार्थसिद्ध्यर्थे जपे विनियोगः॥ परिकीर्त्तितः॥ भैर
वो मूर्ध्नि विन्यस्येत् ललाटे भीमदर्शनं॥ नेत्रयोर्भूत
हननं सारमेयानुगं भ्रुवोः॥ २०॥ कर्णयोर्भूतनाथं
च प्रेतवाहं कपोलयोः॥ नासापुटोष्ठयोश्चैव भ
स्मांगं सर्वभूषणं २१॥ अनादिनाथमास्ये च श

त्रि हस्तं गले न्यसेत्तु ॥ स्कंधयोर्दैत्यमर्दनं वाहूर
तुलतेजसं ॥ २२ ॥ पाणोः कपालिनं न्यस्य हृदये॰
मुंडमालिनं ॥ शांतं वक्षःस्थले न्यस्य स्तनयोः
कामचारिणं ॥ २३ ॥ उदरे च सदा तुष्टं क्षेत्रेशं पार्श्व
योस्तथा ॥ क्षेत्रपालं पृष्टदेशे क्षेत्रज्ञं नाभिदे॰
शके ॥ २४ ॥ पापौघनाशनं कट्यां वटुकं लिंगदेश
के ॥ गुदे रक्षाकरं न्यसेत्तयोर्वीर त्रिलोचनं ॥ २५

॥ जानुनो घुंघुरारावं जंघयो रक्तपायिनं ॥ गु
ल्फयोः पादुका सिद्धं पादपृष्टे सुरेश्वरं ॥ २६ ॥ आ
पादमस्तकं चैव आपदुद्धारकं तथा ॥ पूर्वे डमरु
हस्तं च दक्षिणे दंडधारिणं ॥ २७ ॥ खड्ग हस्तं पश्चि॰
मायां घंटावादिनमुत्तरे ॥ आग्नेय्यामग्निवर्णं च
नैरृत्यां च दिगंबरं ॥ २८ ॥ वायव्यां सर्वभूतस्थमी॰
शान्यां चाष्टसिद्धिदं ॥ ऊर्ध्वे खेचरिणं न्यसेत्पाता॰

नेत्रे रौद्ररूपिणं ॥ २९ ॥ एवं विन्यस्य देहे स्वे षडंगेषु तत
तो न्यसेत् ॥ हृदये भक्तनाथाय आदिनाथाय मू
र्द्धनि ॥ ३० ॥ आनंदपदएवीयनाथायाथ शिखा
सु च ॥ सिद्धशावरनाथाय कवचे विन्यसेत्तथा ॥
३१ ॥ सहजानंदनाथाय न्यसेन्नेत्रत्रये तथा ॥ नि
:सीमानंदनाथाय अस्त्रे चैव प्रयोजयेत् ॥ ३२ ॥
एवं न्यासविधिं कृत्वा यथावत्तदनंतरं ॥ ध्यानं त

स्य प्रवक्ष्यामि याथ्याध्यात्वा पठेन्नरः ॥ ३३ ॥ शुद्ध
स्फटिकसंकाशं सहस्रादित्यवर्चसं ॥ नीलजी
मूतसंकाशं नीलांजनसमप्रभं ॥ ३४ ॥ षड्वा
हुं त्रिनयनं चतुर्वांकुद्धिवाहुकं ॥ दंष्ट्राकरालवद
नेन्द्र पुराएव संकुलं ॥ ३५ ॥ भुजंगाभे खलंदेवम
ग्निवर्णशिरोरुहं ॥ दिगंबरं कुमारीशं वटुकाख्यं म
हाबलं ॥ ३६ ॥ खट्वांगमसिपाशं च शूलं दक्षिणभा

६

गतः ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ ३७ ॥
अग्निवर्णसमोपेतं सारमेयसमन्वितं ॥ ध्यात्वा
जपेत्सुसंतुष्टः सर्वान्कामानवाप्नुयात् ॥ ३८ ॥ कर
कलितकपा[illegible]लः कुंडली दंडपाणिस्तरुणतिमि
रनीलव्यालयज्ञोपवीती ॥ क्रतुसमयसपर्याविघ्न
विच्छेदहेतुर्जयति वटुकनाथः सिद्धिदः साध
कानां ॥ ३९ ॥ अस्य श्रीआपदुद्धारवटुकभैरव

६

स्तोत्रस्य बृहदारण्यको नाम ऋषिः ॥ श्रीभैरवो देवता ॥
अनुष्टुप्छंदः ॥ ह्रीं बीजं वटुकायेति शक्तिः ॥ प्रणव
ः कीलकं अभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ ह्रां वां अं
गुष्ठाभ्यां नमः ॥ ॐ ह्रीं वीं तर्जनीभ्यां नमः ॥ ॐ ह्रूं
वूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं वैं अनामिकाभ्यां नमः
ॐ ह्रौं वौं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः वः करतलक
रपृष्ठाभ्यां नमः ॥ ॐ ह्रां वां हृदयाय नमः ॥ ॐ ह्रीं वीं शिर

७

सेस्वाहा ॥ उँ ह्रूं वुं शिखायै वषट् ॥ ॐ हैं वैं कवचा
यहुं ॥ उँ ह्रौं वौं नेत्रत्रयाय वौषट् ॥ उँ ह्रः वः अस्त्राय
फट् ॥ ॐ भैरवो भूतनाथश्च भूतात्मा भावनः ॥ क्षेत्र
ज्ञः क्षेत्रपालश्च क्षेत्रदः क्षत्रियो विराट् ॥ ४० ॥ श्मश
ानवासी मांसाशी खर्पराशी स्मरांतकः रक्तपः पा
नपः सिद्धः सिद्धिदः सिद्धसेवितः ॥ ४१ ॥ कंकालः का
लशमनः कलाकाष्टातनुः कविः ॥ त्रिनेत्रो बहुने

नामाभ२

७

वे

त्रश्च तथा पिंगललोचनः ॥ ४२ ॥ शूलपाणिः खड्ग
पाणिः कंकाली धूम्रलोचनः ॥ अभीरुर्भैरवो नाथो
भूतपो योगिनीपतिः ॥ ४३ ॥ धनदो धनहारी च धनवान्प्र
तिभानवान् ॥ नागहारो नागपाशो व्योमकेशः कपा
लभृत् ॥ ४४ ॥ कालः कपालमाली च कमनीयः क
लानिधिः ॥ त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलो
कपः ॥ ४५ ॥ त्रिनेत्रतनयो डिंभः शांतः शांतजनप्रियः

बटुको बहुवेषश्च खट्वांगवरधारकः ॥४६॥ भू
ताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ॥ धूर्तो दिगंबर
ःशूरो हरिणः पांडुलोचन ॥४७॥ प्रशांतः शांतिदः शु
द्धः शंकरः प्रियबांधवः ॥४८॥ अष्टमूर्तिर्निधीशश्च
ज्ञानचक्षुस्तपोमयः ॥४८॥ अष्टाधारः षडाधारः स
र्पयुक्तः शिखीसखः ॥ भूधरो भूधराधीशो भूपति
र्भूधरात्मजः ॥४९॥ कंकालधारी मुंडी च नागय

ज्ञोपवीतवान् ॥ जृंभणो मोहनस्तंभी मारणः क्षोभण
स्तथा ॥५०॥ शुद्धनीलांजनप्रख्यो दैत्यहा मुंडभू
षितः ॥ बलिभुग्बलिभुङ्नाथो बालो बालपराक्र
मः ॥५१॥ सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ॥
कामी कलानिधिः कांतः कामिनीवशकृद्वशी ॥५२
॥ सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुरितीरितः ॥ अ
ष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥५३॥ मयाते

९

कथितं देवि रहस्यं सर्वकामदं ॥ यइदंपठते स्तोत्रं नामा
ष्टशतमुत्तमं ॥ ५४ ॥ न तस्य दुरितं किंचिद्रोगेभ्यश्च भ
यं नहि ॥ न शत्रुभ्यो भयं किंचित्प्राप्नुयु मानवाः क्वचि
त् ॥ ५५ ॥ पातकेभ्यो भयं चैव यः पठेत्स्तोत्रमुत्तमं ॥ मा
रीभये राजभये तथा चौराग्निजे भये ॥ बंधने च तथ
था घोरे पठेत्स्तोत्रमनुत्तमं ॥ ५७ ॥ सर्वं प्रशममायाप
ति भयं भैरवकीर्त्तनात् ॥ एकादशसहस्रं तु पुरश्चर

ऐं

णमुच्यते ॥ ५८ ॥ यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः ॥
स सिद्धिं प्राप्नुयाद्दिष्टां दुर्लभामपि मानवैः ॥ ५९ ॥ षण्मा
साद्भूमिकामस्तु जपित्वा प्राप्नुयान्महीं ॥ राजशत्रुविना
शार्थं जपेन्मासाष्टकं यदि ॥ ६० ॥ शत्रोवारत्रयं देविना
शयत्येवाशत्रवान् ॥ जपेन्मासत्रयं मर्त्यो राजानं वश
मानयेत् ॥ ६१ ॥ धनार्थी वा सुतार्थी वा दारार्थी यस्तु मा
नवः ॥ जपेन्मासत्रयं देवि वारमेकं तथा निशि ॥ ६२ ॥

७

१०

धनंपुत्रांस्तथादारान्प्राप्नुयान्नात्रसंशयः ॥ रोगीरोगा
त्प्रमुच्येतबद्धोमुच्येतबंधनात् ॥ ६३ ॥ भीतोभयात्प्र
मुच्येतदेवीसत्यंनसंशयः ॥ निगडैश्चापियोबद्धः का
रागृहनिपातितः ॥ ६४ ॥ शृंखलाबंधनंप्राप्तः पठेद्य
दि दिवानिशं ॥ यान्यान्समीहते कामांस्तांस्तान्प्राप्नो
ससंशयः ॥ ६५ ॥ अप्रकाश्यपरंगुह्यंनदेयंयस्यक
स्यचित् ॥ सुकुलीनायशांतायऋजवेदंभवर्जिते

१०

॥ ६६ ॥ दद्यात्स्तोत्रमिदंपुण्यंसर्वकामफलप्रदं ॥ भैरव°
स्तु प्रहृष्टोऽभूत्स्वयंचमहेश्वरः ॥ ६७ ॥ एवंश्रुत्वाततो
देवीनामाष्टशतमुत्तमं ॥ संतोषंपरमंप्राप्यभैरवस्य
महात्मनः ॥ ६८ ॥ जजापपरयाभक्त्यासर्वैश्वर्येश्वरी
॥ अपूर्वस्यमन्त्रस्यैऽर्कवारेस्थित्वापठतियःपुमान् ॥
अचलांश्रियमाप्नोतिसंग्रामेविजयीभवेत् ॥ ६९
इतिश्रीविश्वसारोद्धारेरुद्रयामलेतंत्रेउमामहेश्वर

सए

११

संवादे श्रीपापद्धुद्धारबटुकभैरवस्तवराजः समाप्तः
॥ वंदे बालं स्फटिकसदृशं कुंतलोल्लासिवक्त्रं दिव्याक
ल्पैर्नवमणिमयः किंकिणीनूपुराद्यैः ॥ दीप्ताकारं वि
शदवदनं सुप्रसन्नं त्रिनेत्रं हस्ताभ्यां वै बटुकमनिशं
शूलखड्गौ दधानं ॥१॥ उद्यद्भास्करसन्निभं त्रिनयनं र
क्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं
करैः ॥ नीलग्रीवमुदारकौस्तुभधरं शीतांशुखंडो

११

ज्वलं धूकारएवासः संभयहरं सदा भावये ॥२॥ ध्याये
न्नीलाद्रिकांतं शशिशकलधरं मुंडमालं महेशं दिग्व
स्त्रं पिंगकेशं डमरुमथ सृणिं खड्ग पाशाभयानि ॥ ना
गं घंटां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं स
र्पाकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनूपुरा
ढ्यं ॥३॥ इति सात्विकराजसतामसध्यानं ॥ मातर्भ
वानि वम्पदरजो भवानि मातर्वदासत्तरो भवानि मा

नू ३

१२

र्भवानीनभावानियपाभवैन्नखड्गवान्पनुदिनं
नपुनभवानि॥१तिष्टतागछ्तावापिस्वयंताजाय
तापिव॥ अयंमंत्रः सदाजस्पः सुरवाये काशिवासि
वं॥१॥ॐ ह्रांह्रींह्रूंवटुकाय आपदुद्धारणाय कुरु कुरु
ॐ ह्रीं नमो इति वटुक मूल मंत्रमायावीजं प्रक्ष[illegible]रंस
ह्री॥ इति आपदुद्धारसंपूर्णं॥ श्रीरस्तु॥ संवत्॥ १८
५३॥ वर्षमार्गोत्तमासे भाद्रपदमासे शुक्लपक्षे ०१२

सि
१२